## ।।प्रकरणम्-७ ।।

# ।। पुराणेषु सांख्ययोगवेदान्तविमर्शः ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| ७.१ | प्रस्तावना । | 337-359 |
| ७.२ | पुराणेषु उपासनाफलम् । | |
| ७.३ | पुराणेषु जीवन्मुक्तशरीरावस्थानम् । | |
| ७.४ | पुराणेषु वेदानां स्वतःप्रामाण्यम् । | |
| ७.५ | पुराणेषु शरीरपञ्चभूतत्वनिरासः । | |
| ७.६ | पुराणेषु मोक्षब्रह्मरूपता । | |
| ७.७ | पुराणेषु देहविभागः । | |
| ७.८ | पुराणेषु आत्मसिद्धिः । | |
| ७.९ | पुराणेषु बन्धमोक्षकारणम् । | |
| ७.१० | पुराणेषु पुरुषबहुत्वव्यवस्था । | |
| ७.११ | पुराणेषु ज्ञानमेव मुक्तिकारणम् । | |
| ७.१२ | पुराणेषु अदृष्टकारणनिराकरणम् । | |
| ७.१३ | पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् । | |
| ७.१४ | पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम् । | |
| ७.१५ | पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् । | |

## प्रकरणम् ७ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

### ७.१ प्रस्तावना ।

**ज्ञानं च लोके यदिहास्ति किञ्चित्**

**सांख्यगतं तच्च महन्महात्मन्[1] ।।**

सांख्यदर्शनस्यानुसारं निरवयवा प्रकृतिरेव जगतो मूलं कारणम् अस्ति, तदेव मूलकारणमुपादानकारणरूपे स्वीकृतमस्ति । अस्यां प्रकृतौ गुणानां वैषम्यादपि महदादीनां तत्त्वानां क्रमश उत्पत्तिर्भवति । श्रीविष्णुपुराणस्यानुसारं विष्णुरेव परात्परं तत्त्वं वर्तते तथा स्वप्रकृतिभूताया मायाया अनुसारं जगतः सृष्टिर्जायते । प्रकरोतीति प्रकृतिः, मूला चासौ प्रकृतिरिति मूलप्रकृतिः, अनेन प्रकारेण प्रकृतेर्विविधानां स्वरूपाणां विवेचनेऽल्पबुद्धिर्मनुष्योऽसमर्थः प्रतीयते, मायामवगन्तुं योगिनामेव नितरां विषयो वर्तते, अतो मम 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' शोधमहानिबन्धस्य सप्तमे प्रकरणे पुराणेषु उपासनाफलम् , पुराणेषु जीवन्मुक्तशरीरावस्थानम् , पुराणेषु वेदानां स्वतःप्रामाण्यम् , पुराणेषु शरीरपञ्चभूतत्वनिरासः, पुराणेषु मोक्षब्रह्मरूपता, पुराणेषु देहविभागः, पुराणेषु आत्मसिद्धिः, पुराणेषु बन्धमोक्षकारणम् , पुराणेषु पुरुषबहुत्वव्यवस्था, पुराणेषु ज्ञानमेव मुक्तिकारणम्, पुराणेषु अदृष्टकारणस्य निराकरणम् , पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् , पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेक- प्रमाणम् , पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् , इत्यादीनां पञ्चदशविषयाणां विवेचनं क्रियते , अयमेव

---

[1] म. भा. शान्तिपर्व ३०१।१०३

विषयः प्रायः सर्वेषु पुराणेषु पुराणकारैः प्रतिपादितो वर्तते, अनेन कारणेन पुराणकारैः प्रतिपादितं विषयमवगम्य भोक्ता परमात्मनो महिमानं च विज्ञाय सर्वेभ्यः सांसारिकैर्दुःखैरवश्यमेव विमुक्तो भवति, तद्यथा –

**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।**
**जुष्टं यदा पश्यत्यन्तमीशमस्य महिमानमिति जीवलोकः[१] ।।**

**७.२ पुराणेषु उपासनाफलम् ।**

**इतरस्यापि नात्यन्तिकम् ।।**
**सङ्कल्पितेऽप्येवम् ।।**
**भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवत्[२] ।।**

उपास्यते परमात्मा यया सेति उपासना, यद्यपि समुच्चयविककल्पौ न भवतस्तथापि आत्मोपसनासंज्ञकेन ज्ञानेन तत्त्वज्ञानस्य समुच्चयविकल्पौ भवतः, कथं यद् – उपास्यं सदा सर्वदा सर्वथा च अमायिकमस्ति, अतो सूत्रकारः कथयति यद् – इतरस्यापि नात्यन्तिकम् , अ**नेन** सूत्रेणोपास्यं सदा सर्वदा सर्वथा च अमायिकं नास्ति, कथं यद् – उपास्यरूप आत्मा तेष्वध्यस्तेषु पदार्थेषु प्रविष्टो भवति, अत उपासनायाः किं गलमस्ति ? तदा भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवद्भवति, अर्थात्पवित्रस्य पुरुषस्य मानसचिन्तनस्य प्रभावेन सर्वं प्रकृतितुल्यमेव भवति, इदमेव सर्व्वाणि पुराणानि कथयन्ति तद्यथा –

**यस्य हस्तौ च पादौ च पुनश्चैव सुसंयुतम्।**

---

[1] श्वेता. उ. ४।७

[2] सांख्यप्रवचनभाष्य–३।२७–२९

**विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते[1]।।**

**तस्मान्महिम्नो विप्रेन्द्र गङ्गायाः शक्यते नहि।**

**पारं गन्तुं सुराधीशैर्ब्रह्मविष्णुशिवैरपि ।।**

**यन्नामस्मरणादेवमहापातककोटिभिः ।**

**विमुक्तो ब्रह्मसदनं नरो याति न संशयः[2] ।।**

**गङ्गा गङ्गेति यन्नाम सकृदप्युच्यते यदा ।**

**तदैव पापनिर्मुक्तो ब्रह्मलोके महीयते[3] ।।**

**उद्यानं दर्शितं देव ! शोभया परया युतम् ।**

**क्षेत्रस्य तु गुणान् सर्वान् पुनर्वक्तुमिहार्हसि ।।**

**अस्य क्षेत्रस्य माहात्म्यमविमुक्तस्य तत्तथा ।**

**श्रुत्वापि हि न मे तृप्तिरतो भूयो वदस्व मे[4]।।**

**नैमिषेऽथ कुरुक्षेत्रे गङ्गाद्वारे च पुष्करे ।**

**स्नानात्संसेविताद्वापि न मोक्षः प्राप्यते यतः ।।**

**इह संप्राप्यते येन तत एतद्विशिष्यते ।**

**प्रयागे च भवेन्मोक्ष इह वा मत्परिग्रहात्[5] ।।**

एतत्स्मृतं प्रियतमं मम देवि ! नित्यं क्षेत्रं विचित्रतरुगुल्मलतासु पुष्पम् । अस्मिन्मृतास्तनुभृतः पदमाप्नुवन्ति मूर्खागमनेन रहितापि न संशयोऽत्र[1]।

1 अग्निपुराणम् १०९।१

2 श्रीनारदपुराणम् ९।१४६-१४७

3 श्रीनारदपुराणम् ९।१४८

4 श्रीमत्स्यपुराणम् १८०।४५-४६

5 श्रीमत्स्यपुराणम् १८०।५५-५६

**जन्ममृत्युजरामुक्तं परं याति शिवालयम् ।**

**अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम्[२] ।।**

**यास्यन्ति परमं मोक्षं वाराणस्यां यथा मृताः ।**

**वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी[३] ।।**

**वाराणसीं समासाद्य पुनाति कुलत्रयम् ।**

**वाराणस्यां महादेवं ये स्तुवन्त्यर्च्चयन्ति च[४]।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु उपासनाफलम् ' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.३ पुराणेषु जीवन्मुक्तशरीरावस्थानम् ।

**जीवनमुक्तश्च ।।**

**उपदेश्योपदेष्टृत्वात् तत्सिद्धिः[५]।।**

उत्तममध्यमाधमास्ववस्थासु कस्यामप्यवस्थायां स्थितो जीवन्मुक्तः कथितो वर्तते । इयं सिद्धिः शास्त्रेषु विवेकविषये गुरुशिष्यभावस्य श्रवणेन जीवन्मुक्तस्य प्राप्यते, कथं यद् - उपदेष्टृत्वभाव एव जीवन्मुक्ते सम्भवितुमर्हति । जीवितानां तत्त्वदर्शिनामृषीणामुपदेश एव शास्त्रवचनमस्ति, न्यायवार्तिककारः कथयति तद्यथा -

**जीवितानां तत्त्वदर्शिनामृषीणामुपदेशरूपं शास्त्रम्[१] ।**

---

[1] श्रीमत्स्यपुराणम् १८०।७९

[2] श्रीकूर्मपुराणम् ३१।४०

[3] श्रीकूर्मपुराणम् ३१।४९

[4] श्रीकूर्मपुराणम् ३१।५३

[5] सांख्यप्रवचनभाष्य-३।७८-७९

इत्थं जीवन्मुक्तशरीरावस्थानमेव सर्व्वाणि पुराणान्यनेन प्रकारेण चर्चयन्ति तद्यथा –

स शिष्यैः संवृतो धीमान् गुरुर्द्वैपायनो मुनिः ।
जगाम विपुलं लिङ्गमोङ्कारं मुक्तिदायकम्[२] ।।
अत्र देवर्षयः पूर्वे सिद्धा ब्रह्मर्षयस्तथा ।
उपास्य देवमीशानं प्राप्तवन्तः परं पदम्[३] ।।
ज्ञात्वा कलियुगं घोरमधर्मबहुलं जनाः ।
कृत्तिवासं न मुञ्चन्ति कृतार्थास्ते न संशयः[४] ।।
गायन्ति सिद्धाः किल गीतकानि
ये वाराणस्यां निवसन्ति विप्राः।

तेषामथैकेन भवेन मुक्ति-
र्ये कृत्तिवासं शरणं प्रपन्नाः[५] ।।
आराधयन्ति प्रभुमीशितारं
वाराणस्यामध्यगता मुनीन्द्राः ।
यजन्ति यज्ञैरभिसन्धिहीनाः
स्तुवन्ति रुद्रं प्रणमन्ति शम्भुम्[६]।।
ब्रह्मचारी जितक्रोधस्त्रिरात्रं यदि तिष्ठति ।

---

[1] न्या. वा.-१।१।२

[2] श्रीकूर्मपुराणम् ३२।१

[3] श्रीकूर्मपुराणम् ३२।१०

[4] श्रीकूर्मपुराणम् ३२।२१

[5] श्रीकूर्मपुराणम् ३२।२६

[6] श्रीकूर्मपुराणम् ३२।२८

**सर्वपापविशुद्धात्मा सोऽश्वमेधफलं लभेत्[१] ।।**

**कार्तिकस्य च माहात्म्यं ब्रूहि सूत ममाग्रतः ।**

**तद्व्रतस्य फलं किं वा दोषं किं तदकुर्वतः[२] ।।**

**भक्त्या शृणोति यो मर्त्यो दीपमाहात्म्यमुत्तमम् ।**

**सर्वपापविनिर्मुक्तः स याति विष्णुमन्दिरम्[३] ।।**

**इत्यृषेर्वचनं श्रुत्वा मार्कण्डेयस्य धीमतः ।**

**नदीप्रवाहसंयुक्ता कुरुक्षेत्रं विवेश ह[४] ।।**

**ततश्चौशनसं तीर्थं गच्छेत्तु श्रद्धयान्वितः ।**

**उशना यत्र संसिद्धो ग्रहत्वं समवाप्नुयात्[५] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु जीवन्मुक्तशरीरावस्थानम् ' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

**७.४ पुराणेषु वेदानां स्वतःप्रामाण्यम् ।**

**अपौरुषेयत्वं तत्कर्तुः पुरुषस्याभवात्[६] ।।**

सम्पूर्णो वेदराशिर्नित्यो वर्तते, अथवा वेदा अपौरुषेयास्सन्ति, तस्य वेदस्य कोऽपि कर्ता नास्ति, भगवान् वेदः स्वयमेव कथयति यथा –

---

1 श्रीकूर्मपुराणम् ३७।२३

2 पद्मपुराणम् ४।३।१

3 पद्मपुराणम् ४।३।३५

4 श्रीवामनपुराणम् ३३।१

5 श्रीकूर्मपुराणम् ३९।१

6 सांख्यप्रवचनभाष्य-५।४५

**तस्माद्यज्ञात्सर्व्वहुत ऋचः सामानि जज्ञिरे ।**
**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत[१] ।।**
**श्रेयः साधनता ह्येषां नित्यं वेदात्प्रतीयते ।**
**ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः[२] ।।**
**प्रत्यक्षेणाऽनुमित्या वा यस्तूपायो न विद्यते ।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता[३] ।।**

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयतीति वेदः, यस्मिन्न दृष्टेपि कृतबुद्धिरुपजायते तत्पौरुषेयत्वम्भवति, तद्भिन्नम् अपौरुषेयत्वम्भवति, अतो वेदानां शब्दाः स्वाभाविक्या शक्त्या अर्थबोधनं कुर्व्वन्ति, अतो निजशक्त्यभिव्यक्तेः स्वतःप्रामाण्यं सिद्धं भवति, इदमेव सर्व्वेषां वेदानां निजशक्त्यभिव्यक्तेः स्वतःप्रामाण्यमेव सर्व्वाणि पुराणान्यनेन प्रकारेण चर्चां कुर्व्वन्ति, तत्र विशेषरूपेण श्रीमद्भागवतमहापुराणस्य दशमस्कन्धस्य सप्ताशीतितमेऽध्याये श्रीपरीक्षिता संपृष्टः श्रीशुको वेदस्तुत्रिं करोति, प्रमुखरूपेण श्रीशुकमुखकमलान्निर्गता वेदस्तुतिरेव वेदाना स्वतःप्रामाण्यं वर्त्तते, तंत्रैव स्वयं भगवानेव कथयति यद् – श्रुतयो यत्र शेरते' अतो मम शोधमहानिबन्धस्य विस्तारभयात् 'पुराणेषु वेदानां स्वतःप्रामाण्यम्' इति विषयमत्रैव संक्षेपेण चर्चयित्वा विषयमिमं समाप्नोमि ।

## ७.५ पुराणेषु शरीरपञ्चभूतत्वनिरासः ।

---

1 शुक्लयजुर्वेदः–३१।७

2 वे. सा. इ. पृष्ठसं. ८

3 वे. सा. इ. पृष्ठसं. ९

**न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्[1] ।।**

बहूनां भिन्नजातीयानां चोपादानत्वं घटपटादिस्थले न दृष्टमिति सजातीयमेवोपादानम् । इतरच्च भूतचतुष्टयमुपष्टम्भकमित्याशयेन पाञ्चभौतिकस्य व्यवहारो वर्तते । शरीरस्य निर्माणे केवलं पार्थिवतत्त्वस्यैव प्रधानता विद्यते । अन्यानि जलतेजोवाय्वादीति चत्वारि तत्त्वानि शरीरस्य रचनायामुपष्टम्भकमात्राणि नाम सहायकानि सन्ति, अनेन नियमेन शरीरपञ्चभूतत्वस्य निरासः कृतः, इममेव विषयमादाय पुराणानि **कथयन्ति यथा –**

**युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा ।**
**मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ।।**
**नैतदेवं यथाऽऽत्थ त्वं यदहं वच्मि तत्तथा ।**
**एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ।।**
**यासां व्यतिकरादासीद्विकल्पो वदतां पदम् ।**
**प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ।।**
**परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ ।**
**पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितम् ।।**
**एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ।**
**पूर्वस्मिन् वा परस्मिन् वा तत्त्वे तत्त्वानि सर्वशः ।।**
**पौर्वापर्यमतोऽमीषां प्रसंख्यानमीप्सताम् ।**
**यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसम्भवात्[2] ।।**

---
[1] सांख्यप्रवचनभाष्य–५।१०२

[2] श्रीमद्भागवतपुराणम् ११।२२।।४–९

अनेन प्रकारेण पुराणेषु चर्चितं ‘पुराणेषु शरीरपञ्चभूतत्वनिरासः’ इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.६ पुराणेषु मोक्षब्रह्मरूपता ।

समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता[१] ।।

समाधिसुषुप्त्यरवस्थयोर्मोक्षावस्थाया विशेषतां दर्शयन् सांख्यदर्शनकारः कथयति यद् -

द्वयोः सबीजमन्यत्र तद्धतिः[२] ।।

एतयोरवस्थयोर्ब्रह्मरूपता सबीजा भवति, अर्थाद् - बन्धप्राप्तेः क्लेशकर्मवासनादीनि कारणानि सन्ति, किन्तु मोक्षावस्थायामेतेषामभावो भवति । अनेन कारणेन मोक्षावस्थायां त्रिविधदुःखानामात्यन्तिकी निवृत्तिर्भवति, इयमेव मोक्षावस्थाया विशेषता वर्तते, इममेव विषयमादाय सर्व्वाणि पुराणानि कथयन्ति तद्यथा -

७.६.१ श्रीमद्भागवतमहापुराणे मोक्षब्रह्मरूपतानिरूपणम् ।

**य एतदानन्दसमुद्रसम्भृतं**
**ज्ञानामृतं भागवताय भाषितम् ।**
**कृष्णेन योगेश्वरसेविताङ्घ्रिणा**
**सच्छ्रद्धयाऽऽसेव्य जगद्विमुच्यते।।**
**भवभयमपहन्तुं ज्ञानविज्ञानसारं**
**निगमकृदुपजह्रे भृङ्गवद्वेदसारम् ।**

[1] मनुस्मृतिः-१२।९

[2] सांख्यप्रवचनभाष्य-५।१२४-१२५

**अमृतमुदधितश्चापयद् भृत्यवर्गान्**

**पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि**[१] **।।**

सर्व्वेषु पुराणेषु मोक्षब्रह्मरूपताया वर्ण्णनं कृतमस्ति, विस्तारभयादत्र न क्रियते ।

७.७ पुराणेषु देहविभागः ।

**न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ।।**

**त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः**[२] **।।**

मन्वादिस्मृतीनामाधारेण प्रमाणितमिदं भवति यत् – कर्मणामनुरूपं फलभोगाय पुरुषः स्थावराणि शरीराणि प्राप्नोति तद्यथा –

**शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।**

**वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्**[३] **।।**

शारीरिकपापेन स्थावराणां योनिमवाप्नोति, वाक्पापेन पक्षिणां वा पशूनां योनिमवाप्नोति, मानसपापेन चाण्डालादीनां योनिमवाप्नोति । अनेन प्रकारेण त्रिधा व्यवस्था कृता वर्तते तद्यथा –

१. कर्मदेहः ।

२. भोगदेहः ।

३. उभयदेहः ।

---

[1] श्रीमद्भागवतमहापुराणम्-११।३०।४७-४९

[2] सांख्यप्रवचनभाष्य-५।१२४-१२५

[3] सांख्यप्रवचनभाष्य-५।१२४-१२५

इत्थं कर्मदेहोपभोगदेहोभयदेहेन देहाः त्रिविधाः सन्ति, परमर्षीणां कर्मदेहा वर्तन्ते, इन्द्रादीनां देवानां भोगदेहा वर्तन्ते, राजर्षीणामुभयदेहा वर्तन्ते, तत्र चतुर्थशरीरं सूत्रकारः कथयति यथा –
न किञ्चिदप्यनुशयिनः[1] ।।

त्रिविधेषु देहेषु विरक्तानामेकमपि शरीरं नास्ति, अनुशयो नाम वैराग्यमस्ति, यथा – दत्तात्रेयजडभरतादीनां विरक्तानामासीत् । अनुशयिन्यामवस्थायां देहेन किमपि कर्म कश्चिदपि भोग एव क्रिया भवति, इममेव विषयमादाय सर्व्वाणि पुराणानि कथयन्ति तद्यथा –

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु वेदानां स्वतःप्रामाण्यम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.८ पुराणेषु आत्मसिद्धिः ।

**अस्त्यात्मा नास्तित्वसाधनाभावात् ।।**

**देहादिव्यतिरिक्तोऽसौ वैचित्र्यात्[2] ।।**

समस्तजडतत्त्वैरात्मनो भिन्नतायाः प्रतिपादनमनेन सूत्रेण करोति यद् – आत्मनोऽस्तित्वमस्ति, कथं यद् – आत्मनोऽभावस्य साधकतममेकमपि प्रमाणं नास्ति, जानामीत्येवं प्रतीयमानतया पुरुषः सामान्यतया सिद्ध एवास्ति, बाधकानां प्रमाणानामभावादिति, 'अहं जानामि, अहमस्मि' इत्याकारकमनुभवं सर्वे कुर्व्वन्ति, अनेनैव सामान्यदृष्टान्तेन सिद्धमिदं याति, तथा च देहादिव्यतिरिक्तोऽसौ वैचित्र्याद् विलक्षणतापि दृश्यते, अयमात्मा द्रष्टा वर्तते, देहादारभ्य

---

1 सांख्यप्रवचनभाष्य–५।१२६

2 सांख्यप्रवचनभाष्य–६।१–२

प्रकृतिपर्य्यन्तेषु सर्व्वेषु पदार्थेष्वत्यन्तो भिन्नः प्रतीयते, इदमेव जडचेतयोर्मध्ये वैचित्र्यमस्ति, अर्थात् - परिणामित्वापरिणामित्वादीनि वैधर्म्याणि सन्ति, इममेव विषयमादाय सर्वेषु पुराणेषु श्रीविष्णुपुराणं कथयति तद्यथा -

७.८.१ श्रीविष्णुपुराणे आत्मसिद्धिः ।

श्रीविष्णुपुराणे शरीरादिव्यतिरिक्तस्यात्मनोऽस्तित्वसिद्धये आत्मसिद्धिवर्ण्णनं कुर्व्वाणो विष्णुपुराणकारः श्रीव्यासो लिखति यद् -

**त्वं किमेतच्छिरः किन्तु शिरस्तव तथोदरम् ।**
**किमु पादादिकं त्वं वै तवैतद्धि महीपते ।।**
**समस्तावयवेभ्यस्त्वं पृथग्भूप व्यवस्थितः ।**
**कोऽहमित्यत्र निपुणो भूत्वा चिन्तय पार्थिव[१] ।।**

इत्थं श्रीविष्णुपुराणस्य द्वितीयांशे आत्मविषयकं वर्ण्णनं कृतमस्ति, श्रीमद्भागवतपुराणादिषु सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

७.९ पुराणेषु बन्धमोक्षकारणम्।

**परधर्मत्वेऽपि तत्सिद्धिरविवेकात् ।।**
**अनादिरविवेकोऽन्यथा दोषद्वयप्रसक्तेः[२] ।।**

यद्यपि जीवात्मा स्वभावतो मलिनोऽस्वच्छो विकारी स्यात्तदा शतेषु जन्मस्वपि तस्य कदापि मुक्तिर्नैव भवितुमर्हति, तदा शङ्कामिमामनेन प्रकारेण सूत्रकारः समादधाति यत् - सुखदुःखादिविकारो गुणात्मिकायाः प्रकृतेर्धर्मो वर्तते, तथापि आत्मनः

---

1 श्रीविष्णुपुराणम्- २।१३।९८-९९

2 सांख्यप्रवचनभाष्य-६।११-१२

प्रकृत्या सह सम्पर्करूपस्याविवेकस्य कारणेन तान्धर्मान्स्वस्यैवावगच्छति, अयमेवाविवेकोऽनादिकालत आयाति, किन्तु अनादिं न मत्वा सादिमपि मन्यते, तदा दोषद्वयस्य प्रसक्तिर्भवति, इममेव विषयमादाय श्रीकूर्मपुराणं कथयति तद्यथा –

७.९.१ कूर्मपुराणे बन्धमोक्षकारणम् ।

कूर्मपुराणे बन्धस्य तथा मोक्षस्य वर्ण्णनं कूर्मपुराणकारः श्रीव्यासो लिखति यद् –

**यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात्स्वभावतः ।**
**न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि[1] ।।**
**किञ्च स्वयं विकारित्वे मोक्षो नैवोपपद्यते ।**
**स्वयं मोहविकारेण पुनर्बन्धप्रसङ्गतः[2] ।।**

यथा – अग्निः प्रज्वलनाय न भवति, तथैव जलं क्लेदाय न भवति, कथं यद् – तदेव द्रव्यं तस्यैव द्रव्यस्य विकाराय न भवति, अनेन प्रकारेण यः स्वयं विकारी वर्तते, तस्य मोक्षः कदापि भवितुन्नार्हति, यदा मोक्षो न भवति, तस्य तस्य बन्धनस्य प्रसङ्गो भवति, इत्थं कूर्मपुराणे बन्धमोक्षकारणस्य विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

७.१० पुराणेषु पुरुषबहुत्वव्यवस्था ।

**पुरुषबहुत्वं व्यवस्थातः[3] ।।**

---

[1] कूर्मपुराणम्- २।२।९
[2] कूर्मपुराणम्- २।२।१२-१३
[3] सांख्यप्रवचनभाष्य-६।४५

यद्यात्मा प्रतिशरीरं भिन्नो भिन्नो मन्यते, किन्तु संभवो नास्ति, कथं यद् - अयमनेकात्मवाद आत्माऽद्वैतश्रुत्या बाधितो वर्तते, श्रुतयस्त्वात्मानमनेकं न मन्यन्ते, तदा शङ्कामिमामनेन प्रकारेण सूत्रकारः समादधाति यत् - श्रुतिप्रतिपादितस्य बन्धमोक्षस्य व्यवस्थां दृष्ट्वा पुरुषस्यानेकत्वं स्पष्टम्भवति, सर्व्वा उपनिषदोऽपि कथयन्ति यथा -

ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ती[१] ।।

इममेव पुरुषबहुत्वविषयमादाय सर्वेषु पुराणेषु श्रीविष्णुपुराणं कथयति तद्यथा -

७.१०.१ श्रीविष्णुपुराणे पुरुषबहुत्वव्यवस्था ।

**काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।**
**शब्दमूर्तिधरस्यैतद् वपुर्विष्णोर्महात्मनः ।।**
**यानि मूतान्यमूर्तानि यान्यत्रान्यत्र वा क्वचित् ।**
**सन्ति वै वस्तुजातानि तानि सर्व्वाणि तद्वपुः ।।**
**अहं हरिः सर्वमिदं जनार्दनो नान्यत् ततः कारणकार्यजातम् ।**
**ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्ति[२] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु पुरुषबहुत्वव्यवस्था' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

[1] श्वेता. उ.- ३।१०

[2] श्रीविष्णुपुराणम्-१।२२।८४-८७

७.११ पुराणेषु ज्ञानमेव मुक्तिकारणम् ।

**लोकस्य नोपदेशात्सिद्धिः पूर्ववत् ।।**

**पारम्पर्येण तत्सिद्धौ विमुक्तिश्रुतिः[१] ।।**

उत्तमोत्तमस्य चन्द्रलोकस्य निवासिभिः प्रदत्तोपदेशेन विवेकज्ञानस्य प्राप्तिर्न भवति , तथा च श्रुतिवचनानि ब्रह्मलोकादनावृत्तिं प्रतिपादयन्ति, तदा तेषां श्रुतिवचनानां गतिः केन प्रकारेण भवति ? तदा शङ्कामिमामनेन प्रकारेण सूत्रकारः समादधाति यत् - पारम्पर्येण विवेकज्ञानस्य सिद्धौ सत्यां मुक्तिर्भवति, इदमेव अनावृत्तिश्रुतेः तात्पर्य्यमस्ति, इममेव ज्ञानमेव मुक्तिकारणविषयमादाय सर्वेषु पुराणेषु श्रीविष्णुपुराणं कथयति तद्यथा -

७.११.१ श्रीमद्भागवतमहापुराणे ज्ञानमेव मुक्तिकारणम् ।

**यो विद्याश्रुतसम्पन्न आत्मवान्नानुमानिकः ।**
**मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ।।**
**ज्ञानविज्ञानस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः ।**
**स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः ।।**
**ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ।**
**ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति माम् ।।**
**तपस्तीर्थं जपो दानं पवित्राणीतराणि च ।**
**नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता ।।**
**तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ।**
**ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः[२] ।।**

---

[1] सांख्यप्रवचनभाष्य-६।५७-५८

[2] श्रीमद्भागवतमहापुराणम्-११।१९।१-५

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु ज्ञानमेव मुक्तिकारणम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.१२ पुराणेषु अदृष्टकारणनिराकरणम् ।

अदृष्टद्वारा चेदसम्बद्धस्य तदसम्भवाज्जलादिवदङ्कुरे[1] ।।

अधिष्ठानं विनैवादृष्टद्वारा भोक्तृभ्यो भोगायतनस्य निर्माणं भवति, तदा सूत्रकारोऽनेन प्रकारेण समादधाति यत् - अदृष्टद्वारा चेदसम्बद्धस्य तदसम्भवाद् जलादिवदङ्कुरे, अर्थाद् - जीवात्माधिष्ठितं विनाऽदृष्टद्वारा शरीरमिदं स्वीकुर्म्मस्तदा जीवात्मसम्बन्धरहितानां तत्त्वानां शरीरस्य निर्माणे कारणताया असम्भवेन जलादिवदङ्कुरस्य समानं भवति । शरीरनिर्माणस्य मूलोपादानकारणैः शुक्राणुभिः सह भोक्ता जीवात्मा सदा सर्वदा सर्वथा चोपस्थितो भवति, अनेन सिद्धमिदं याति यद् - अदृष्टेन युक्तस्यात्मनः संयोगरूपेऽधिष्ठानस्य भोगायतनस्य शरीरस्य निर्माणे वर्तमानं कारणं तिष्ठति, इममेव अदृष्टकारणनिराकारणविषयमादाय सर्वेषु पुराणेषु श्रीमद्भागवतमहापुराणं कथयति तद्यथा -

७.१२.१ श्रीमद्भागवतमहापुराणेऽदृष्टकारणनिराकरणम् ।

**स्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ।**

**वियण्मूत्रपूये रमतां कृमीणां कियदन्तरम् ।।**

**अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित्।**

---

[1] सांख्यप्रवचनभाष्य-६।६१

**विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥**

**अदृष्टादश्रुताद्भावान्न भाव उपजायते ।**

**असम्प्रयुञ्जतः प्राणान्शाम्यति स्तिमितं मनः॥**

**तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेन्द्रियैः ।**

**विदुषां चाप्यविश्रब्धः षड्वर्गः किमु मादृशाम्[१] ॥**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु अदृष्टकारणनिराकरणम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.१३ पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् ।

निर्गुणत्वात्तदसम्भवादहङ्कारधर्मा ह्येते[२] ॥

भोक्ता यदि जीवात्मा वर्तते, स जीवात्मा तु निर्गुणो विद्यते, अनेन कारणेन तेन सहादृष्टयोर्धर्माधर्मयोः सम्पर्कः कदापि संभवो नास्ति, अतोऽदृष्टद्वारा आत्मनोऽधिष्ठातृत्वस्य कल्पना कदापि समुचिता नास्ति, कथं यद् - येऽदृष्टादयो अहंकारादायस्तस्यैव धर्मोऽस्ति । धर्माधर्मादीनां कर्मणामनुष्ठानं तदैव संभवति, यदा मनुष्येऽहम्भावो विद्यते । अनुष्ठानस्य पूर्वे संकल्पो 'अहं करिष्ये' इत्थम्भवति, अतः कथनस्येदमेव तात्पर्य्यमस्ति यद् - अहंकारेणैव धर्माधर्मयोः समुत्पत्तिर्भवति, तेन कारणेन धर्माधर्मयोरहंकारो धर्मो विद्यते । आत्मा तु सत्त्वादिगुणरहितो निर्गुणः कथितो वर्तते, इममेव विषयं संयोगमात्रेण भोक्तुरधिष्ठातृत्वविषयमादाय सर्वेषु पुराणेषु श्रीविष्णुपुराणं कथयति तद्यथा -

[1] श्रीमद्भागवतमहापुराणम्-११।२७।२१-२४

[2] सांख्यप्रवचनभाष्य-६।६२

७.१३.१ श्रीविष्णुपुराणे संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् ।

**निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमम् ।**
**आत्मसम्बोधविषयं सत्तामात्रमलक्षणम् ।।**
**प्रशान्तमभयं शुद्धमविभाव्यमसंश्रितम् ।**
**विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् ।।**
**तत्रान्यज्ञानरोधेन योगिनो यान्ति ये लयम् ।**
**संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विज ।।**
**एवम्प्रकारममलं नित्यं व्यापकमक्षयम् ।**
**समस्तभेदरहितं विष्ण्वाख्यं परमं पदम्[1] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि।

७.१४ पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम् ।

विशिष्टस्य जीवत्वमन्वयव्यतिरेकात्[2] ।।

तत्सत्त्वे सत्त्वमित्यन्वयः, तदभावेऽभाव इति व्यतिरेकः, अनेन अन्वयव्यतिरेकेण जीवस्य श्रुतिप्रतिपादनं जीवपरिच्छिन्नत्वमनुपपन्नम् , तथेश्वरस्य प्रतिषेधात्पुरुषाणां चैकरूप्याज्जीवात्मपरमात्मविभागोऽपि शास्त्रीयोऽनुपपन्नो विद्यते, तदा शङ्कामिमामनेन प्रकारेण सूत्रकारः समादधाति यत् - विशिष्टस्य जीवत्वम् अन्वयव्यतिरेकात्, अर्थाद् बुद्ध्यादिभिर्युत आत्मैव जीवः

---

1 श्रीविष्णुपुराणम्-१।२२।४८-५२

2 सांख्यप्रवचनभाष्य-६।६३

कथितो वर्तते, जीव-बल, प्राणधारणयोः[१] अतः प्राणित्वविशिष्टो जीवो वर्तते, जीवत्वं वा प्राणित्वं वाहंकारविशिष्टस्य पुरुषस्य धर्मो विद्यते, कथं यद् - अन्तःकरणानां बाह्यकरणानां चेन्द्रियाणां साधारणवृत्तिः प्राणाः सन्ति, प्राणविशिष्टत्वादेवात्मा जीवसंज्ञामवाप्नोति । अनेन प्रकारेण अन्वयव्यतिरेकप्रमाणेन स्पष्टमिदम्भवति यत्केवलः पुरुषो जीवो वा प्राणी नास्ति, अनेन सूक्ष्मशरीरेण आत्मावेष्टितो भवति, आत्मनि सूक्ष्मशरीरस्य आवेष्टनं भवति, इममेव विषयं संयोगमात्रेण भोक्तुरधिष्ठातृत्वविषयमादाय सर्वेषु पुराणेषु श्रीनारदपुराणं कथयति तद्यथा -

**यदा त्वभेदविज्ञानं जीवात्मपरमात्मनोः ।**
**भवेत्तदा मुनिश्रेष्ठाः पाशच्छेदो भविष्यति[२] ।।**
**आत्मानं द्विविधं प्राहुः परापरविभेदतः ।**
**परस्तु निर्गुणः प्रोक्त अहंकारयुतोऽपरः[३] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

७.१५ पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् ।

कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिर्बीजाङ्कुरवत्[४] ।।

प्रकृतेः स्वस्वामिभावः कर्मनिमित्तो भवति, अर्थाद्भोग्यभोक्तृभाव एव कर्मनिमित्तः कथितो वर्तते, अतः प्रकृतिर्भोग्या

---

1 भ्वादिधातुः-४४२
2 श्रीनारदपुराणम्-३१।६१
3 श्रीनारदपुराणम्-३१।६१
4 सांख्यप्रवचनभाष्य-६।६७

तथा जीवात्मा भोक्ता नाम स्वामी विद्यते, इयं प्रकृतिरनेकरूपेष्वात्मनः कृते भोग्यवस्तूनां भोगसाधनानां समुपस्थितिं करोति, किन्तु तत्र पुरुषः कर्मनिमित्तो भवति, तद्यथा - बीजाङ्कुरयोः प्रवाहोऽनादित आयाति, तथैव कर्मतो भोगः, एवं भोगतः पुनः कर्मनिमित्तो भवति, किन्तु सांख्याचार्य्यः पञ्चशिखाचार्य्योऽविवेकनिमित्तकमेव ज्ञानं मन्यते इममेव विषयं प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वविषयमादाय सर्वेषु पुराणेषु ब्रह्मवैवर्तपुराणं कथयति तद्यथा -

७.१५.१ श्रीमद्भागवतपुराणे प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम्

**कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ।**
**भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ।।**
**प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ।**
**ब्रूहि कारणयोरस्य सदसच्च पदात्मकम् ।।**
**यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।**
**प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्[1] ।।**
**पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित् ।**
**अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ।।**
**यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः ।**
**अपां रसस्य च यथा तथा बुद्धेः परस्य च ।।**
**अकर्तुः कर्मबन्धोऽयं पुरुषस्य यदाश्रयः ।**
**गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ।।**

[1] श्रीमद्भागवतपुराणम्-३।२६।८-१०

**क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणम् ।**

**अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते[1] ।।**

७.१५.२ ब्रह्मवैवर्तपुराणे प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् ।

**मातृज्ञानप्रदाता च सिद्धानां च गुरोगुरुः[२] ।।**

७.१५.३ श्रीविष्णुपुराणे प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् ।

**निमित्तमात्रमेवासीत्सृज्यतां सर्गकर्म्मणि ।**

**प्रधानकारणीभूता यतो वै सृज्यशक्तयः ।।**

**निमित्तमात्रं मुक्त्वैव नान्यत्किञ्चिदवेक्षते ।**

**नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम्[३] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम्' इति मम शोधमहानिबन्धस्य सप्तमे प्रकरणे पुराणेषु उपासनाफलम्, पुराणेषु जीवन्मुक्तशरीरावस्थानम्, पुराणेषु वेदानां स्वतःप्रामाण्यम्, पुराणेषु शरीरपञ्चभूतत्वनिरासः, पुराणेषु मोक्षब्रह्मरूपता, पुराणेषु देहविभागः, पुराणेषु आत्मसिद्धिः, पुराणेषु बन्धमोक्षकारणम्, पुराणेषु पुरुषबहुत्वव्यवस्था , पुराणेषु ज्ञानमेव मुक्तिकारणम्, पुराणेषु अदृष्टकारण- निराकरणम्, पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् ,पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम्, पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य

---

[1] श्रीमद्भागवतपुराणम्-३।२७।१७-२०

[2] श्रीविष्णुपुराणम्-१।४।५०-५२

[3] श्रीमद्भागवतपुराणम्-३।२६।८-१०

अनादित्वम्, इत्थं मम शोधमहानिबन्धस्य सप्तमे प्रकरणे पञ्चदशोपप्रकरणानि यथामति विस्तार्य्य सप्तमं प्रकरणं समाप्नोमि ।